स्नुषागमनजन्यं। स्त्रियास्तु पुत्रपितृश्वश्रुरगमनजन्यं। इति प्रायश्चित्तविवेकः ॥

अतिबलः, त्रि, (अतिशयितं बलं यस्य सः बहुव्रीहिः!) प्रबलः। अतिशयबलवान्। प्रकृष्टबलविशिष्टः। इति मेदिनी ॥ (विजृम्भमाणोऽतिबलः प्रत्यबुध्यत राक्षसः ॥ इति रामायणम्) ॥

अतिबला, स्त्री, अत्यन्तं बलं यस्याः सा बहुव्रीहिः।) विश्वामित्रेण रामाय दत्ते अस्त्रविद्याविशेषे यथा,—

"गृहाण द्वे इमे विद्ये बलामतिबलां तथा"।

इत्यादि रामायणे।) पीतबला। पीतवर्णवाड़ियाला इति ख्याता। पिटारणी। इति मदनविनोदः ॥ गुरशकरीभेदः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। बलिका २ बल्या ३ विकङ्कता ४ वाट्यपुष्पिका ५ घण्टा ६ शीता ७ शीतपुष्पा ८ भूरिचला ९ वृष्यगन्धिका १०। तस्या गुणाः। तिक्तत्वं। कटुत्वं। वातक्रिमिनाशित्वं। दाहतृष्णाविषच्छर्द्दिक्लेदोपशमकारित्वञ्च। इति राजनिर्घण्टः ॥

अतिभारगः, पुं, (अतिभारेण वेगेन गच्छति अतिभार+गम्+कर्त्तरि ड, उपपदसमासः।) (खरः। अश्वतरः। गर्द्दभात् वड़वाजातः अश्वभेदः।) खेसरः। खचर इति भाषा। इति राजनिर्घण्टः ॥

अतितभीः, पुं, (अतिबिभेत्यस्याः अति भी+अपादाने क्विप्।) वज्रज्वाला। इति हलायुधः ॥

अतिभूमिः, स्त्री, (अतिशयिता भूमिर्म्मर्य्यादा कर्म्मधारयः,अतिमर्य्यादा।) आधिक्यं। यथा। प्राप्य मन्मथमदादतिभूमिं दुःसहस्तनभराः सुरतस्येति माघः ॥ अतिशयितभूमिः ॥

अतिमङ्गल्यः, पुं, (अतिमङ्गलाय हितः अतिमङ्गल+यत्।) विल्ववृक्षः। इति रत्नमाला ॥ अतिशयमङ्गलजनके त्रि ॥

अतिमर्य्यादः, त्रि, (मर्य्यादामतिक्रान्तः प्रादिसमासः।) अतिशयितः। इति हेमचन्द्रः॥ अतिशये क्ली ॥

अतिमात्रं, क्ली, (मात्रामल्पमतिक्रान्तं प्रादिसमासः।) अतिशयः। तद्युक्ते त्रि। इत्यमरः ॥ (यथा शाकुन्तले। अतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात् ॥)

अतिमुक्तः, (पुं) माधवीलता। इत्यमरः ॥ तिनिशवृक्षः। इति हेमचन्द्रः ॥

अतिमुक्तः, त्रि, (अतिशयेन मुक्तः निर्व्वाणमुक्तिं गतः अति+मुच्+कर्त्तरि क्तः, निर्व्वाणमुक्तिविशिष्टः।) निष्फलः। निःसङ्गः। इतिविश्वमेदिन्यौ ॥ प्राप्तनिर्व्वाणः ॥

अतिमुक्तकः, पुं, (मुच्+भावे क्त, आतशयेन मुक्तं बन्धशैथिल्यं यस्य सः बहुव्रीहिः, कप्।) तिनिशवृक्षः। इत्यमरः ॥ तिन्दुकवृक्षः। पुष्पवृक्षविशेषः। तत्पर्य्यायः। पुण्ड्रकः २ मल्लिनी ३ भ्रमरानन्दा ४ कामुककान्ता ५। तस्य गुणाः। कषायत्वं। शीतलत्वं। श्रमनाशित्वं। पित्तदाहज्वरोन्मादहिक्काच्छर्द्दिनिवारकत्वञ्च। इति राजनिर्घण्टः ॥

(कर्णिकारान् कुरुवकान् चम्पकानतिमुक्तकान् ॥ इति रामायणे) ॥

अतिमोदा, स्त्री, (अत्यन्तो मोदो गन्धो यस्याः सा।) नवमल्लिका। इति राजनिर्घण्टः ॥

अतिरसा, स्त्री, अत्यन्तो रसो यस्याः सा।) मूर्व्वालता। रास्ना। क्लीतनकं। इति राजनिर्घण्टः ॥

अतिरिक्तः, त्रि, (अति रिच्+कर्त्तरि क्तः। श्रेष्ठे भिन्ने शून्ये च। भावे क्तः, अतिरेके आधिक्ये च।) अधिकः। अतिशयितः। तत्पर्य्यायः। समधिकः २। इत्यमरः ॥

अतिरेकः, त्रि, (अति रिच्+भावे घञ्। आधिक्ये श्रेष्ठत्वे च।) अतिशयः। यथा,—

"सम्पूर्णौ तूभयोर्ज्ञेयमतिरेके परेऽहनि"।

इति तिथ्यादितत्त्वं ॥

अतिरोगः, पुं, (अत्यन्तोरोगः व्याधिः अति रुज्+भावे घञ्।) क्षयव्याधिः! इति राजनिर्घण्टः ॥

अतिरोमशः, पुं, (अतिशयितं रोम तदेव विद्यतेऽस्य अतिरोमन्+मत्वर्थे श) वनच्छागलः। इति हारावली ॥ वृहत्वानर इति केचित् ॥ अतिशयलोमयुक्ते त्रि ॥

अतिलोमशा, स्त्री, (अतिशयितं लोम अतिलोमन्+मत्वर्थे श, स्त्रियां टाप्।) नीलबुह्ना। इति रत्नमाला ॥

अतिवर्त्तुलः, पुं, (अतिशयितो वर्त्तुलः कर्म्मधारयः।) कलाय विशेषः। वाँटुला कड़ाइ इति भाषा। इति रत्नमाला ॥ अस्य गुणाः सतीलशब्दे द्रष्टव्याः ॥

अतिवादः, पुं, (अति+वद्+भावे घञ्।) अभिवादः। परुषोक्तिः। इत्यमरटीकायां रमानाथः ॥ ("अतिवादांस्तितिक्षेत नावमन्येत कञ्चनः।

नचेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥ मनुः।)

अतिविकटः, पुं, (अतिशयितो विकटः भीषणः) दुष्टहस्ती। इति शब्दमाला ॥ अतिकराले त्रि ॥

अतिविषा, स्त्री, (विषमतिक्रान्ता प्रादिसमासः। वा विषमतिक्रान्तं यया बहुव्रीहिः।) वृक्षविशेषः। आतइष। आतैच इति भाषा। तत्पर्य्यायः। विश्वा २ विषा ३ प्रतिविषा ४ उपविषा ५ अरुणा ६ शृङ्गी ७ महौषधं ८। इत्यमरः ॥ काश्मीरा ९ श्वेता १०। इति रत्नमाला ॥ श्वेतकन्दा ११ भृङ्गी १२ भङ्गुरा १३ विरूपा १४ श्यामकन्दा १५ विषरूपा १६ वीरा १७ माद्री १८ श्वेतवचा १९ अमृता २०। इति राजनिर्घण्टः ॥ तस्या गुणाः। पाचकत्वं। ग्राहित्वं। दोषनाशित्वञ्च। इति राजवल्लभः ॥ कटुत्वं। कफपित्तज्वरामातिसारकासविषच्छर्द्दिनाशित्वञ्च।

"त्रिविधातिविषा ज्ञेया शुक्ला कृष्णा तथारुणा।

रसवीर्य्यविपाकेषु निर्व्विषेव गुणाधिका" ॥

इति राजनिर्घण्टः ॥

"विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा।

शुक्लकन्दा चोपविषा भङ्गुरा घुणवल्लभा ॥

विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत्।

कफपित्तातिसारामविषकासवमिक्रिमीन्" ॥

इति भावप्रकाशः ॥

अतिविस्रब्धनवोढ़ा, स्त्री, (अतिविस्रब्धा अतिप्रश्रययुक्ता नवोढ़ा प्रणयिनी नायिका इति यावत् कर्म्मधारयः।)स्वीयान्तर्गतमध्यनायिकाभेदः। तस्याः लक्षणं। नायकातिशयप्रश्रययुक्ता। अस्याश्चेष्टा। सधैर्य्यसापराधनायके वक्रोक्तिः। अधैर्य्यसापराधनायके परुषवाक्। इति रसमञ्जरी ॥

अतिवृष्टिः, स्त्री, (अतिशयेन वृष्टिः वर्षणं।) अतिशयवृष्टिः। ईतिविशेषः। स तु महद्वर्षणरूपः कृषीणामुत्पातः। यथा,—

"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः।

प्रत्यासन्नाश्च राजानः षड़ेता ईतयः स्मृताः ॥

इति पराशरः ॥

अतिवेलं, क्ली, (वेलां मर्य्यादां कूलं वा अतिक्रान्तं प्रादिसमासः, ह्रस्वः।) अतिशयिते त्रि। इत्यमरः॥ (जलमतिवेलं पयोराशेः ॥ नीतिमाला)।

अतिव्यथा, स्त्री, (अत्यन्ता व्यथायातना कर्म्मधारयः। व्यथ+भावे अङ् स्त्रियां टाप्।) अतिशययातना। तीव्रवेदना। इति शब्दरत्नावली ॥

अतिव्याप्तिः, स्त्री, (अतिशयेन व्याप्तिर्व्यापनं।)अतिशयव्यापनं। अलक्ष्ये लक्षणस्य गमनं। यथा साध्याभाववदवृत्तित्वमिति व्याप्तिलक्षणे धूमवान् वह्निरित्यत्र धूमाभावाधिकरणाङ्गारवृत्तित्वाभावमादाय अतिव्याप्तिः। इति तार्किकाः॥ स्वाव्यवहितप्राक्क्षणावच्छेदेन रविभुज्यमानराशीयरविसंयोगविशिष्टस्वान्तिमक्षणकत्वं मलमासत्वं भानुलङ्घिते अतिव्याप्तिवारणाय औत्पातिकभिन्नत्वेन विशेषणीयं। इति मलमासतत्त्वटीका ॥ मुख्यफलजनकव्यापारजनकत्वे सति मुख्यफलाजनकत्वं अङ्गत्वं घटादावतिव्याप्तिवारणाय सत्यन्तं इति तिथ्यादितत्त्वटीका च ॥

अतिशक्तिता, स्त्री, (अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यं यस्य बहुव्रीहिः, तस्य भावः तल् स्त्रियां टाप्) विक्रमः। महाबलं। इत्यमरः ॥

अतिशक्तिभाक् [ज्] पुं, (अतिशयिता शक्तिः कर्म्मसाधनसामर्थ्यं कर्म्मधारयः। तां भजते अतिशक्ति+भज्+कर्त्तरि ण्विः, उपपदसमासः।) अतिशयशक्तिविशिष्टः। अतिसमर्थः। सवीर्य्यमतिशक्तिभाक्। इत्यमरः ॥

अतिशयः, पुं, (अति+शी+अच्) अधिकः। तत्पर्य्यायः। भरः २ अतिवेलं ३ भृशं ४ अत्यर्थं ५ अतिमात्रं ६ उद्गाढ़ं ७ निर्भरं ८ तीव्रं ९ एकान्तं १० नितान्तं ११ गाढ़ं १२ वाढ़ं १३ दृढ़ं १४। इत्यमरः ॥ अतिमर्य्यादः १५ उत्कर्षः १६। इति हैमचन्द्रः॥ बलवत् १७ सुष्ठु १८ किमुत १९ सु २० अतीव २१ अति २२। इत्यव्ययवर्गे अमरः ॥ अतिरिक्तः २३ समधिकः २४। इति विशेष्यनिघ्नवर्गे अमरः ॥

अतिशयनं, क्ली. (अति+शी+भावे ल्युट्) अतिशयः। तद्युक्ते त्रि। इत्यमरटीकायां रमानाथः। (शयनमतिक्रान्तं अत्यादीतिसमासः। अतिक्रान्त शयनम् ॥)

अतिशायनं, क्ली, (अति शी+स्वार्थे णिच् भावे